শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীনৃসিংহরাঘৱদাসেন কৃতং

# ॥ শ্রী শ্রীনিৱাসরামানুজমহাদেশিকন্ (কাডন্দেতি আণ্ডৱন্) মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী শ্রীনিৱাসরামানুজমহাদেশিকন্ (কাডন্দেতি আণ্ডৱন্) মঙ্গলম্ ॥

শ্রীৱাসলক্ষ্মণোদীর্ণৱেদান্তযুগলাশযম্।
শ্রীৱাসগুরূত্তংসং মনৱৈ মুনিপুঙ্গৱম্॥ 1 ॥

শ্রীরঙ্গধাম্নঃ সেৱাযাং নিত্যসক্তায যোগিনে।
শ্রীনিৱাসলক্ষ্মণাখ্য গুরৱে নিত্যমঙ্গলম্॥ 2 ॥

শ্রীনিৱাসমুনীশানপ্রাপ্তসার্ৱজ্ঞশালিনে।
তৎপদাম্ভোরুহদ্ৱংদ্ৱচঞ্চরীকায মঙ্গলম্॥ 3 ॥

নাথযামুন যোগীন্দ্রাৱতারোঽযং মহামুনিঃ।
ইতি সংসেৱ্যমানায যতিশ্রেষ্ঠায মঙ্গলম্॥ 4 ॥

গুরুৱর্যপদত্রাণপরিচর্যারতাত্মনে।
ভরতোপমচারিত্ররক্ষকাযাস্তু মঙ্গলম্॥ 5 ॥

সদা রঙ্গপদধ্যাত্রে সদা স্মেরমুখায চ।
সদাচার্যকৃপালব্ধশেমুষীকায মঙ্গলম্॥ 6 ॥

যতীন্দ্রমাহানসিকগুরুসেৱারতাত্মনে।
মূর্তীভূতগুরুপ্রেম্ণে গুরুৱর্যায মঙ্গলম্॥ 7 ॥

পরভক্তিপরজ্ঞানপরিপূর্ণায যোগিনে।
পারযিত্রে চ লোকস্য পরতুল্যায মঙ্গলম্॥ 8 ॥

সন্যস্তৈষণসার্থায শান্তিনন্দনৱাসিনে।
শাসিতেন্দ্রিযৱৃত্তায শান্তচিত্তায মঙ্গলম্॥ **9** ॥

উৎকূলচিত্তসংক্ষোভশমযিত্রে কৃতাত্মনে।
দ্ৱযার্থধ্যাযিনে শিষ্যধূর্ৱহাযাস্তু মঙ্গলম্॥ **10** ॥

সর্ৱমন্ত্রৱিদে সিদ্ধমন্ত্রায ৱিদিতাত্মনে।
কারণজ্ঞাননির্ধূতকারণাযাস্তু মঙ্গলম্॥ **11** ॥

তীরভঙ্গাপনোদায নিত্যতীরনিৱাসিনে।
নির্ণীতপরমার্থায নিত্যমুক্তায মঙ্গলম্॥ **12** ॥

গুর্ৱাজ্ঞযা পরানন্দস্থেম্নে সেৱোপলব্ধযে।
নির্ধূতেতরমন্ত্রায নিত্যসেৱ্যায মঙ্গলম্॥ **13** ॥

ৱিশাখস্তম্ভভূতায ৱিশতাং সত্ত্ৱসদ্মনি।
সিংহমাসীযমূলর্ক্ষেঽৱতীর্ণাযাস্তু মঙ্গলম্॥ **14** ॥

নৃসিংহরাঘৱেণোক্তং ছাত্রেণাচার্যমঙ্গলম্।
পঠতাং শৃণ্ৱতাং নিত্যং তনোতু ভুৱি মঙ্গলম্॥ **15** ॥

॥ ইতি শ্রী শ্রীনিৱাসরামানুজমহাদেশিকন্ মঙ্গলং সমাপ্তম্॥